# दूर्वासूक्तम्

## dūrvāsūktam

सहस्रपरमा देवी शतमूला शताङ्कुरा ।
सर्वगं् हरतु मे पापं दूर्वा दुस्स्वप्ननाशनी ॥१॥

sahasraparamā devī śatamūlā śatāṅkurā |
sarvagṁ haratu me pāpaṁ dūrvā dussvapnanāśanī ||1||

काण्डात्काण्डात् प्ररोहन्ती परुषः परुषः परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥२॥

kāṇḍātkāṇḍāt prarohantī paruṣaḥ paruṣaḥ pari
evāno dūrve pratanu sahasreṇa śatena ca ||2||

या शतेन प्रतनोषि सहस्रेण विरोहसि ।
तस्यस्ते देवीष्टके विधेम हविषा वयम् ॥३॥

yā śatena pratanoṣi sahasreṇa virohasi |
tasyaste devīṣṭake vidhema haviṣā vayam ||3||

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा ।
शिरसा धारयिष्यामि रक्षस्व मां पदेपदे ॥४॥

aśvakrānte rathakrānte viśnu krānte vasundharā |
śirasā dhārayiṣyāmi rakṣasva māṁ padepade ||4||

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ ||

radiosai